# 7 – अथ सप्तम दशकम्

## ॥ हिरण्य गर्भोत्पत्ति ॥

एवं देव! चतुर्दशात्मकजगद्रूपेण जातः पुनः
तस्योर्ध्वं खलु सत्यलोकनिलये जातोऽसि धाता स्वयम् ।
यं शंसन्ति हिरण्यगर्भमखिलत्रैलोक्यजीवात्मकं
योऽभूत् स्फीतरजो विकारविकसन्नानासिसृक्षारसः ॥ (7.1)

सोऽयं विश्वविसर्गदत्तहृदयः सम्पश्यमानस्स्वयं
बोधं खल्वनवाप्य विश्वविषयं चिन्ताकुलस्तस्थिवान् ।
तावत्त्वं जगतां पते! तप तपेत्येवं हि वैहायसीं
वाणीमेनमशिश्रवः श्रुतिसुखां कुर्वंस्तपः प्रेरणाम् ॥ (7.2)

कोऽसौ मामवदत् पुमानिति जलापूर्णे जगन्मण्डले
दिक्षूद्वीक्ष्य किमप्यनीक्षितवता वाक्यार्थमुत्पश्यता ।
दिव्यं वर्षसहस्रमात्ततपसा तेन त्वमाराधितः
तस्मै दर्शितवानसि स्वनिलयं वैकुण्ठमेकाद्भुतम् ॥ (7.3)

माया यत्र कदापि नो विकुरुते भाते जगद्भ्यो बहिः
शोक क्रोध विमोह साध्वसमुखा भावास्तु दूरं गताः ।
सान्द्रानन्दझरी च यत्र परमज्योतिः प्रकाशात्मके
तत्ते धाम विभावितं विजयते वैकुण्ठरूपं विभो! ॥ (7.4)

यस्मिन् नाम चतुर्भुजा हरिमणि श्यामावदातत्विषो
नानाभूषणरत्न दीपितदिशो राजद्विमानालयाः ।
भक्तिप्राप्ततथाविधोन्नतपदा दीव्यन्ति दिव्या जनाः
तत्ते धाम निरस्तसर्वशमलं वैकुण्ठरूपं जयेत् ॥ (7.5)

नानादिव्यवधूजनैरभिवृता विद्युल्लतातुल्यया
विश्वोन्मादन हृद्य गात्रलतया विद्योतिताशान्तरा ।
त्वत्पादाम्बुज सौरभैककुतुकाल्लक्ष्मीः स्वयं लक्ष्यते
यस्मिन् विस्मयनीय दिव्यविभवं तत्ते पदं देहि मे ॥ (7.6)

तत्रैवं प्रतिदर्शिते निजपदे रत्नासनाध्यासितं
भास्वत्कोटिलसत्किरीट कटकाद्याकल्पदीप्राकृति ।
श्रीवत्सांकितमात्तकौस्तुभमणिच्छायारुणं कारणं
विश्वेषां तव रूपमैक्षत विधिस्तत्ते विभो! भातु मे ॥ (7.7)

कालाम्भोदकलायकोमलरुचां चक्रेण चक्रं दिशां
आवृण्वानमुदारमन्दहसितस्यन्द प्रसन्नाननम् ।
राजत्कम्बु गदारि पंकजधर श्रीमद्भुजामंडलं
स्रष्टुस्तुष्टिकरं वपुस्तव विभो! मद्रोगमुद्वासयेत् ॥ (7.8)

दृष्ट्वा संभृतसंभ्रमः कमलभूस्त्वत्पादपाथोरुहे
हर्षावेश वशंवदो निपतितः प्रीत्या कृतार्थीभवन् ।
जानास्येव मनीषितं मम विभो! ज्ञानं तदापादय
द्वैताद्वैतभवत्स्वरूपपरमित्याचष्ट तं त्वां भजे ॥ (7.9)

आताम्रे चरणे विनम्रमथ तं हस्तेन हस्ते स्पृशन्
बोधस्ते भविता न सर्गविधिभिर्बन्धोऽपि संजायते ।
इत्याभाष्य गिरं प्रतोष्य नितरां तच्चित्तगूढस्स्वयं
सृष्टौ तं समुदैरयः स भगवन्नुल्लासयोल्लाघताम् ॥ (7.10)

॥ इति हिरण्य गर्भोत्पत्ति सप्तम दशकम् संपूर्णम्॥

**द्वितीयस्कंध परिच्छेदः संपूर्णम्**